लोकप्रियसाहित्यग्रन्थमाला-14

श्री 'काश्मीरिक' सदानन्दयतिप्रणीतः

# स्वरूपप्रकाशः

( सप्तदशशताब्द्यां विरचितोऽद्वैतवेदान्तग्रन्थः )

गयाचरणः त्रिपाठी

राष्ट्रिय संस्कृत संस्थान

नई दिल्ली

लोकप्रियसाहित्यग्रन्थमाला-14

श्री 'काश्मीरिक' सदानन्दयतिप्रणीतः

# स्वरूपप्रकाशः

(सप्तदशशताब्द्यां विरचितोऽद्वैतवेदान्तग्रन्थः)

प्रधानसम्पादकः

**प्रो. राधावल्लभः त्रिपाठी**

सम्पादकः

**गयाचरणः त्रिपाठी**

**राष्ट्रिय संस्कृत संस्थान**

**मानित विश्वविद्यालय**

**(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)**

**नई दिल्ली**

# Introduction

This small but very valuable tract of Advaita Vedānta having *Svarūpaprākaśa* as its title, is being presented to the scholars for the first time. It has Sadānanda Yati for its author who mentions with great reverence Brahmānanda Yati as his spiritual preceptor in the colophons appended to the end of each chapter, as well as in the concluding verse of the work. This Sadānanda Yati belonged to Kashmir and is totally different from the author of *Vedāntasāra*, one of the most popular and well known text of Advaita Vedānta which has 'Sadānanda Yogīndra' as its author and who mentions Advayānanda as his preceptor in the 2nd verse of the Vedāntasara.[1] Further, the *Vedāntasāra* of Sadānanda is an older work and was composed during the early years of the 16th Century (1500-1525 C.E.)[2] whereas our

---

1 अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति॥

2 This is presumed mainly on the basis of a statement of Nṛsiṃha Yogī who wrote the commentary *Subodhinī* on the Vedāntasāra in the year 1588 C.E. and who refers to Sadānanda yogīndra as his 'Paramaguru' (इयता प्रबन्धेन प्रतिपादितेऽस्मिन् वेदान्तसाराख्ये ग्रन्थे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्य-सदानन्दयोगीन्द्रेण महापुरुषेण). For the date of *Subodhinī*, cf. the

*ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।*
*आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥*
इति कोटिशः। इति दिक्॥

नन्वस्तु सुषुप्तौ स्वरूपसुखानुभवस्तथापि 'दुःखमहमस्वाप्सम्' इति परामर्शेन दुःखानुभवोऽपि दुर्वार इति चेत्, नैवम्॥ तदानीं दुःखसामग्र्यभावात्। शय्यादेरसमीचीनत्वे दुःखमित्युपचारात् तादृश-प्रतीत्युपपत्तिः। अतो दुःखसामग्र्यभावान् न हि जागरेऽपि सामग्रीं विनैव दुःखमनुभूयते, आकस्मिकत्वापत्तेः। न च सुखेऽप्येष प्रसङ्गः, सुखस्य चात्मस्वरूपत्वेन नित्यत्वात्। अस्तु वावस्थात्रयस्य त्रैविध्याङ्गीकारेण सुषुप्तावपि दुःखानुभवः। तथा हि प्रमाज्ञानं जाग्रज्जाग्रत्, शुक्तिरजतादिविभ्रमो जाग्रत्स्वप्नः, श्रमादिना स्तब्धीभावो जाग्रत्सुषुप्तिः। एवं स्वप्ने मन्त्रादिप्राप्तिः स्वप्नजाग्रत्, स्वप्ने मया स्वप्नो दृष्ट इति स्वप्नस्वप्नः, स्वप्नदशायां च यत्किञ्चिदनुभूय जाग्रद्दशायां च तत् कथयितुं न शक्यते तत् स्वप्नसुषुप्तिः। एवं सुषुप्तावस्थायामपि सात्त्विकी या सुखाकारा वृत्तिः सा सुषुप्तिजाग्रत्, तदनन्तरं सुखमहमस्वाप्समिति परामर्शः, तत्रैव या राजसी वृत्तिः सा सुषुप्तिस्वप्नः, तदनन्तरं दुःखमहमस्वाप्समिति परामर्शोपपत्तिः एवं तामसीवृत्तिः सुषुप्तिसुषुप्तिः। तदनन्तरं गाढं मूढोऽहमासमिति परामर्शः।

नन्वस्तु सुषुप्तिनिर्णयः। पञ्चकोशानां स्वरूपं शरीरत्रयादतिरिच्यते न वा ? शरीरत्रयाभिमानिवत् पञ्चकोशाभिमानिनोऽपि सन्ति न वा ? इति चेच्छृणु। अत्र वक्ष्यमाणस्थूलशरीराणां समष्टिव्यष्टी अन्नमयः कोश इत्युच्यते, *'स वा एषोऽन्नरसमयः पुरुषः'* इति श्रुतेः। तदभिमानिनौ तत्तादात्म्यापन्नौ तप्तायःपिण्डवद्विश्ववैश्वानरौ। एतानि पुनर्वक्ष्य-माणपञ्चीकरणरीत्या चतुर्धा भवन्ति, जरायुजाण्डजस्वेदजोद्भिज्जभेदेन। तत्र सत्त्वप्रधानं देवादिशरीरमयोनिजत्वात्, तेजोमयत्वाद्वा। रजःप्रधानं

राष्ट्रिय संस्कृत संस्थान

मानित विश्वविद्यालय

(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली-110058